# .. Renuka Kavacham 2 from Damareshvaratantra Adhyaya 6 ..

# ॥ રેણુકાકવચં ડામરેશ્વરતન્ત્રે ષષ્ઠિતમોઽધ્યાયઃ ॥

## Document Information

Text title : reNukAkavacham 2 shrIDAmareshvaratantre ShaShThitamo.adhyAyaH
File name : reNukAkavacham2.itx
Category : kavacha
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Description-comments : shrIDAmareshvaratantre ShaShThitamo.adhyAyaH from shrIreNukAtantram, Pitambarapeeth, Datia
Latest update : May 18, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ રેણુકાકવચં ડામરેશ્વરતન્ત્રે ષષ્ઠિતમોऽધ્યાયઃ ॥

॥ શ્રી ગણેશાય નમઃ ॥

શૃણુ દેવિ પ્રવક્ષ્યામિ રેણુકાકવચં પરમ્ ।
યેન વિજ્ઞાનમાત્રેણ સાન્નિધ્યં રેણુકા ભવેત્ ॥

રેણુકાકવચસ્યાસ્ય ભાર્ગવસ્તુ ઋષિઃ સ્મૃતઃ ।
છન્દોऽનુષ્ટુપ્ તથા દેવી રેણુકા દેવતા મમ ॥

ઇષ્ટ-કામ્યાર્થ-સિદ્ધ્યર્થે વિનિયોગો વરાનને ।
રેણુકા મે શિરઃ પાતુ પરા શક્તિસ્વરૂપિણી ॥

ભાલં રક્ષતુ ભુવનેશી લોચનં મે ત્રિલોચની ।
મુખં મે રેણુકા પાતુ નાસિકાં કાલનાશિની ॥

ભ્રુવૌ સુભ્રૂલતા પાતુ દન્તાન્મે કુન્દદન્તિકા ।
ઓષ્ઠં બિમ્બોષ્ઠિકા પાતુ જિહ્વાં પાતુ સુરેશ્વરી ॥

ગ્રીવાં રક્ષતુ ઇન્દ્રાણી કુક્ષૌ રક્ષેત્કુલેશ્વરી ।
ગણ્ડં મે પાતુ ચામુણ્ડા મહાલક્ષ્મીસ્તુ કન્ધરમ્ ॥

અસૌ હંસપ્રિયા પાતુ બાહૂ સાયુધવાહુકા ।
વાણીં વક્ષસ્થલં પાતુ હૃદયં હૃદયેશ્વરી ॥

જઘને ઘનવાહા મે ગુહ્યં ગુહ્યેશ્વરી મમ ।
ઊરૂ વરોરુકા પાતુ શ્રીદેવી સિદ્ધિદેવતા ॥

સર્વાઙ્ગં સર્વદા પાતુ સર્વાણી રૂપિણી વરા ।
ઇતિ શ્રીરેણુકા વર્મ દુષ્કર્મ ત્રાસનં સદા ॥

સ્તુતિમાત્રેણ  ભક્તાનાં સંરક્ષણવિચક્ષણમ્ ।
જપ્ત્વા તુ કવચં દેવ્યાઃ યત્ર તત્ર તુ ગચ્છતિ ॥

તત્ર તત્ર જયો લાભઃ કાર્યસિદ્ધિશ્ચ જાયતે ।
॥ ઇતિ શ્રી ડામરેશ્વરતન્ત્રે રેણુકાકવચં નામ ષષ્ઠિતમોऽધ્યાયઃ ॥

Encoded and proofread by Kaushal S. Kaloo     kaushalskaloo at gmail.com

was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*